**चतुर्थचरणम्, कार्यक्रमः 11**

**पञ्चदिवसीय-ऑनलाइन-राष्ट्रिय-कार्यशाला**

# संस्कृतवाङ्मये शैक्षिकप्रबन्धनं नेतृत्व च

**(Educational Management and Leadership in Sanskrit Vangmaya)**

15-19 मार्च 2021 पर्यन्तम्

## संक्षिप्तप्रतिवेदनम्

भारतसर्वकारस्य शिक्षामन्त्रालयस्य बहुआयामिपरियोजना-**पण्डितमदनमोहनमालवीयराष्ट्रियशिक्षकशिक्षणमिशनमित्यस्य** अन्तर्गतत्वेन स्थापितेन **नवदेहलीस्थश्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये शिक्षणाधिगमकेन्द्रेण** चतुर्थचरणस्य कार्यक्रमाणाम् **'संस्कृतवाङ्मये शैक्षिकप्रबन्धनं नेतृत्व च'** इति विषये एकादश-पञ्चदिवसीयराष्ट्रियकार्यशालायाः आयोजनम् 2021 तमवर्षस्य मार्चमासस्य पञ्चदशदिनाङ्कात् मार्चमासस्य एकोनविंशतितमदिनाङ्कं यावत् कृतम्। कार्यशालायाः मुख्योद्देश्यं प्रतिभागिनां शैक्षिकप्रबन्धननेतृत्व्योः मूलभूतसम्प्रत्ययानां परिचयप्रदानम्, संस्कृतवाङ्मये सम्प्रत्ययानां वर्तमानशिक्षाप्रणाल्यां तेषां शैक्षिकनिहितार्थः प्रासंगिकता च सम्प्रत्ययात्मक अवबोध विकसितः करणीयम्। ऑनलाइनकार्यशालायाः सञ्चालनं गूगलमीट इत्यस्य मञ्चे कृतम्। उद्घाटनसत्रस्य शुभारम्भः शिक्षणाधिगमकेन्द्रस्य परियोजनाध्यक्षया **प्रो. अमितापाण्डेयभारद्वाजमहोदयया** स्वागतभाषणं कार्यशालायाः सन्दर्भैः च कृतम्। तदनु **प्रो. रूपकिशोरशास्त्रीमहोदयानां** (कुलपतिः, गुरुकुलकाँगडीविश्वविद्यालयः, हरिद्वारम्) मुख्यातिथीनां सम्बोधनम्, अध्यक्षीयभाषणं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य माननीयानां कुलपतीनां **प्रो. रमेशकुमारपाण्डेयवर्याणां** च जातम्। **प्रो. के. भरतभूषणवर्येण** (शिक्षासङ्कायप्रमुखः विभागाध्यक्षश्च) धन्यवादज्ञापनेन विहितम्। कार्यशालायाः क्रियान्वयनं विशेषरूपेण अभिकल्पितेषु 30 सत्रेषु कृतम्, तेषु उद्घाटन-प्रबोधन- चतुर्दशप्रदर्शनाधारिततकनीकी-प्रश्नोत्तरसत्रम्, पञ्चस्वाभ्यास-ऑनलाइनमाकलन-प्रतिपुष्टि-अनुभवकथनसमापनादीनि सत्राणि जातानि। अन्तिमतिथिपर्यन्तं 139 प्रतिभागिनां पञ्जीकरणं प्राप्तम्, तेषु 120 कार्यशालायाम् आमन्त्रिताः, तथैव 120 प्रतिभागिभिः स्वीयं प्रतिभागस्य प्रतिपुष्टिः प्रदत्तः, परञ्च 98 **प्रतिभागिभिः** कार्यशाला पूर्णं कृतवन्तः, 22 प्रतिभागिनः व्यक्तिगतकारणेन प्रतिभागं न गृहीतवन्तः। 98 प्रतिभागीषु भारतस्य 17 राज्येभ्यः 76 प्रतिभागिनः 02 केन्द्रशासितप्रदेशेभ्यः 22 प्रतिभागिनः आसन्। 17 राज्येभ्यः प्रतिभागिनाम् आन्ध्रप्रदेशतः 05, असमतः 01, बिहारतः 06, गुजराततः 03, हरियाणातः 07,, झारखण्डतः 02, कर्नाटकतः 02, केरलतः 01, महाराष्ट्रतः 10, ओडिशातः 02, राजस्थानतः 09, तमिलनाडुतः 03, तेलंगानातः 02, त्रिपुरातः 02, उत्तरप्रदेशतः 13, उत्तराखण्डतः 06, पश्चिमबंगालतः 02 तथा च द्वे-केन्द्रशासितप्रदेशेभ्यः चण्डीगढतः 01, देहलीतः 21 च प्रतिभागिनः आसन्। कार्यशालाविषये निष्णातानां देशस्य प्रतिष्ठितसंस्थानानाम् **अष्टविशेषज्ञानां** कुशलमार्गदर्शने समस्ततकनीकीसत्राणां सञ्चालनं जातम्। एतेषु सत्रेषु कार्यशालायाः मुख्यविषयाः आसन् ते यथा- शैक्षिकप्रबन्धनम्, नेतृत्वकौशलम्, शैक्षणिकपरिस्थितिजन्यनेतृत्वं च, प्रभावीप्रबन्धननेतृत्वशैल्याः च, सामञ्जस्यपूर्ण-अधिगमः संस्कृतिनिर्माणहेतु नेता, संस्कृतवाङ्मये शैक्षिकनेतृत्वम्, विदुरनीतिः, कौटिल्यार्थशास्त्रम्, श्रीमद्भगवद्गीता, वाल्मीकिरामायणं एवं वैदिकसाहित्ये प्रबन्धनं उपनिषत्सु प्रबन्धनं नेतृत्वं च। तकनीकीसत्राणां विषयेषु आधारितं 10 **दत्तकार्याणि** प्रतिभागिनां प्रदत्ताः। ऑनलाइनपरीक्षणम् अपि प्रशासितम्, तेषु 54% प्रतिभागिनः 60 **प्रतिशतात्** अधिकान् अङ्कान् लब्धवन्तः। अन्ते विशेषज्ञानां प्रस्तुतव्याख्यानानां गुणवत्ताविषये ऑनलाइनप्रतिपुष्टिः चतुश्श्रेणीषु कृता। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकं** च प्राप्तम्। तथा च तेषां औसतम् 74% 23% 02% एवं 01% क्रमशः श्रेणीषु प्राप्तम्। अनेन साकं कार्यशालायाः सन्दर्भे ऑनलाइनप्रतिपुष्टिः 10 बिन्दूनां पञ्चश्रेण्यां प्राप्ता। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकम्, असंतोषजनकं** च। एतेषां 10 बिन्दूनां प्राप्तश्रेण्याम् औसतप्रतिशते 79% **उत्कृष्टम्**, 17% **अति-उत्तमम्**, 03% **उत्तमम्**, 00% **संतोषजनकं** च प्राप्तम्। समापनसत्रे परियोजनाध्यक्षया गणमान्यातिथीनां स्वागतं कार्यशालाप्रतिवेदनं च प्रस्तुतम्। तदनु **प्रो. वी. मुरलीधरशर्ममहोदयानां** (कुलपतिः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः) मुख्यातिथीनां सम्बोधनम् अध्यक्षीयभाषणं माननीयानां **प्रो. रमेशकुमारपाण्डेयवर्याणां** (कुलपतिः, श्रीला.ब.शा.रा.सं.वि.वि., नवदेहली) च जातम्। शिक्षासङ्कायप्रमुखस्य धन्यवादज्ञापनेन शान्तिपाठेन च कार्यशाला सम्पन्नतां गता। कार्यशालायाः समापनान्तरं सफलप्रतिभागिनां ई-चित्रावली ई-प्रमाणपत्राणि च मेलद्वारा सम्प्रेषितानि।